# Niroshthayam Indira Shatakam

# નિરોષ્ઠ્યમિન્દિરાશતકમ્

## Document Information

Text title : Niroshthayam Indira Shatakam

File name : niroShThyamindirAshatakam.itx

Category : devii, shataka

Location : doc_devii

Author : kRiShNakavi

Proofread by : Rajesh Thyagarajan

Description/comments : From Stotrasamuchchaya 2, Edited by Pandit K. Parameshwara Aithal

Latest update : May 10, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 11, 2023

*sanskritdocuments.org*

# નિરોષ્ઠ્યમિન્દિરાશતકમ્

અથ નિરોષ્ટ્યપદૈર્લલિતામિમાં કલશ સિન્ધુસુતા વિભવોદયામ્ ।
કલયિતું કવિકૃષ્ણ ઇહ સ્તુતિં કલયતે હૃદિ તાં હરિનાયિકામ્ ॥

જયતિ સા જલધેસ્તનયા દયાકલિતનિત્યચરાચરરક્ષણા ।
સહચરી ચ હરેર્લલિતક્રિયા લસિતદૈત્યનિહન્તૃહૃદન્તરા ॥ ૧॥

જયતિ નિખિલનાકિત્રાણદત્તૈકદૃષ્ટિ-
ર્હતનતજનદૈન્યા કીર્તિતા જાનકીતિ ।
સરસિજનિલયા સા સાદરા સારસાક્ષી
ત્રિજગદહિતહારિધ્યાનધારાગ્ર્યહારા ॥ ૨॥

દિનેશસન્તત્યધિનેતૃકૃત્તનિશાચરેશાનશિરા ધરણ્યાઃ ।
આખણ્ડલાદ્યૈરખિલૈશ્ચ કલ્યા કન્યાર્યગણ્યા રથહસ્તિધન્યા ॥ ૩॥

નાકાલયાહારકૃતે નદીશે ધરાધરાધઃસ્થલસન્નિકૃષ્ટે ।
જાતાસ્તતસ્તત્ર રસાર્દ્રચેતાઃ સા શ્રીર્જગત્રાણકૃતાત્તનાથા ॥ ૪॥

સારાસારકલાદેર્જનયિત્રી સરસગાધયા કીર્ત્યા ।
ધીરાગ્રગણ્યદશરથતનયેનૈષા કૃતાખિલશ્રેયઃ ॥ ૫॥

સહૃદયહૃદયારાધ્યા સા યસ્યા નાયકઃ ખ્યાતઃ ।
નેતાર્કસન્તતેર્યસ્ત્રાતા જગતશ્ચરાચરેશશ્ચ ॥ ૬॥

કરકલિતસરસિજશ્રીઃ સરસિજનિલયા ચ સારસાક્ષી યા ।
કરદાનકૃતશ્રેયઃસન્તતિરેષા ચકાસ્તિ સદ્ધૃદયે ॥ ૭॥

નાગેશયસ્ય સા કાન્તા નાકિનાથાર્ચનાદૃતા ।
દાસહૃત્સરસીજાતનિલયા રક્ષણાર્થિની ॥ ૮॥

સરસા દયયા હિ સારસાક્ષી કૃતસન્તાનકલાર્તિહારિણી યા ।
નિજનાથકરસ્થસાયકાલીહતનાકારિરિહાર્યધારણાર્હા ॥ ૯॥

તરઙ્ગિણીનાયકકન્યકાયાઃ કટાક્ષધાટ્યા કલિતશ્રિયસ્તે ।
હરેશ્ચ કૈઙ્કર્યનિરન્તરાશ રાજન્તિ કાલે નિહતારિસઙ્ઘાઃ ॥ ૧૦॥

રણજિતરજનીચરેશસેના નિખિલજગજ્જનની તથા હિ જઙ્ગે ।
સરસિજનિલયા ધરાર્યકન્યા દિનકરસન્તતિનેતૃનિત્યદારઃ ॥ ૧૧॥

નિજકટાક્ષઝરીકલિતાખિલક્ષયજરાદિરરાતિકૃતાન્તકા ।
ત્રિદશનાથકૃતાર્ચનયા જગજ્જયકરી કિલ સા હરિનાયિકા ॥ ૧૨॥

સાકેત નેતૃદયિતા સૈષા સીતેતિ કીર્તિતા ।
કિરીટા દિલસદ્દેહા જગદાર્તિહરી કિલ ॥ ૧૩॥

નીલનીરદ સઙ્કાશકેશા દાશરથેર્હરેઃ ।
કર્ણાન્તાયતનેત્રાન્તા કાન્તાર્તજનરક્ષિણી ॥ ૧૪॥

કાઙ્ક્ષિતાધિકદાનેન ખ્યાતા સા ધરણીતલે ।
અનાદિનિધિરેષા નઃ શ્રેયઃસન્તાનદાયિની ॥ ૧૫॥

દિનેશતનયાગઙ્ગાસહ્યજાદિતટીતલે ।
સા શ્રીઃ કલિતસાન્નિધ્યા જયદા રાજતે કિલ ॥ ૧૬॥

કાઙ્ક્ષિતાધિકદાયિન્યા સીતયા હિતયા તથા ।
કૃતાર્થાનીહ કાર્યાણિ સનાથાશ્ચ કૃતા નરાઃ ॥ ૧૭॥

શરણાગતાર્તિહરણા યૈષા જનનીહ સહ્યજાતીરે ।
સહૃદયહૃદયારાધ્યા જયતિ ખગેશાનધાર્યનિજચરણા ॥ ૧૮॥

કલિન્દનન્દિનીતીરે નન્દનન્દનલીલયા ।
નનન્દ યેન્દિરાનન્દકલિન્દશ્રીરિહૈધતે ॥ ૧૯॥

ગીતાચાર્યસ્ય દયિતા યા ગીતા કિન્નરીગણૈઃ ।
સા હિ શ્રીરિન્દિરા દાસ્યશ્રીકરી હરિનન્દિની ॥ ૨૦॥

હરેઃ સા નિત્યકલ્યાણદાયિની જનની ચ નઃ ।
તરઙ્ગયતિ યા શ્રેયશ્ચરાચરહિતૈષિણી ॥ ૨૧॥

નારાયણસ્ય કાન્તા સારાર્દ્રહૃદન્તરે કલિતકેલિઃ ।
હરિણનયના ચ કાલે કરિણાર્ચિતનૈજચરણનલિના ચ ॥ ૨૨॥

નિરીક્ષિતા તયા કાલે હરિણાક્ષ્યા ધરા હિ યા ।
નિધયસ્તત્ર નાકેશલાલ્યા રાજન્તિ તત્ક્ષણાત્ ॥ ૨૩॥

શારદસરસિજનયના નારદકલગીતિગેયચરિતા ચ ।
સારદધરણેસ્તનયા સારદધીસ્તારકારિનતિકલ્યા ॥ ૨૪॥

શિથિલિતકલિહાનિઃ સાગરેન્દ્રસ્ય કન્યા
દશશતનયનાદ્યૈરાદરાદર્ચનીયા ।
જનયતિ તનયાદીનાદરેણાર્યહૃદ્યા-
નખિલચિદચિદાદિત્રાણનાદત્તદીક્ષા ॥ ૨૫॥

સા સાગરેન્દ્રતનયા દાશાર્હહૃદિ સ્થિરાસના જનની ।
નાસારત્નધૃણીડિતકાસારજસદૃશનેત્રા યા ॥ ૨૬॥

નારાયણસ્ય ગૃહિણી તારાસઙ્કાશહારલલિતગલા ।
આરાધનાર્હચરણા સારાર્થજ્ઞાનદાયિની જનની ॥ ૨૭॥

સજ્જનરક્ષણધન્યા કન્યા સા સાગરસ્ય કૃતધન્યા ।
તન્યાદનિતરકન્યાદાનાદિશ્રેય આદરાદિહ નઃ ॥ ૨૮॥

હરિહૃદયાન્તઃશરણા શરણાગતસજ્જનાલિનતચરણા ।
સતિ કલિતાદરણા સા જયતીહ તલે સદાહૃતાચરણા ॥ ૨૯॥

સજ્જનૈરારાદૃતાનીહ ધનાનિ નયતે ક્ષણાત્ ।
ધરણીતનયા સૈષા નાનાદેશગતાર્થિનઃ ॥ ૩૦॥

સદાદૃતા સદારાધ્યા સદાનન્દાસનસ્થિતા ।
કદા હિ કલયેન્નૈજકટાક્ષલહરીરિહ ॥ ૩૧॥

તિલકાલઙ્કૃતા હ્યેષાનિલજાતકૃતાદરા ।
ધરાયાસ્તનયા ખ્યાતા જાનકીતિ ધરાતલે ॥ ૩૨॥

દદ્યાદદ્ય શ્રેયઃ કિરીટહારાદિલસિતનિજદેહા ।
જલનિધિકન્યા ધન્યા યત્સ્થાનનતિક્ષતારિકલિકાર્શ્યાઃ ॥ ૩૩॥

આખ્યાતા દિશિ સૈષા શ્રેયઃસન્તાનશાખિલતિકેતિ ।
નતનાકિશીર્ષરત્નાદૃતનિજનીરાજનક્રિયા જયતિ ॥ ૩૪॥

હાસશ્રિયા લસિતનૈજશરીરયષ્ટિરિન્દ્રાદિનાકિગણદત્તસદાદરાદિઃ ।
કીલાલરાશિતનયા જયતીહ દત્તદાનાદિરાર્યગણગેયનિજાર્યયાત્રા ॥ ૩૫॥

યાતાયાતાદિખેદા દિશાન્તિદારાધિતા સતી ।

ત્રિજગજ્જનની જીયાદિહાચાર્યગણેડિતા ॥ ૩૬॥

યયારાધિતયાનાથાઃ નાથકાર્યાશ્ચ નિશ્ચિતાઃ ।
જનની સા જનત્રાણયાગદીક્ષાદિરેધતે ॥ ૩૭॥

કૃતકૃષ્ણકેલિરેષા સૃજતિ કટાક્ષાન્ હિ યત્ર ધરણિતલે ।
ગજગણ્ડનિર્યદલિગણગાના તસ્ય સ્થલીગૃહસ્યાત્ ॥ ૩૮॥

અગતીન્ સહસા નિરીક્ષ્ય કાલે જનની સા હિ કટાક્ષકાન્તિસારૈઃ ।
હસિતત્રિદશેન્દ્રકીર્તિખણ્ડાન્નિજનાથાઙ્ઘ્રિશરણ્યકાનતાનીત્ ॥ ૩૯॥

નારાયણસ્ય કાન્તા નાકાલયલાલ્યચરણનલિના સા ।
સદ્ધૃદયકલિતનિલયા નિરસિતકલિકાલજાતકાર્શ્ર્યાદિઃ ॥ ૪૦॥

કૃશકરણાદરણાઙ્કા હરિણાઙ્કાદૃતનિજાસ્યઘૃણિનિચયા ।
સરસા દયયા સૈષા ચાહ્લાદકરી ચ સતિ નતે નિત્યા ॥ ૪૧॥

સરસિજાસનશઙ્કરશારદાધરણિધૃત્તનયા દિનતીડિતા ।
કલિતનિત્યગૃહસ્થિતિરેધતે ધૃતદયા ચ હરેર્હૃદયાન્તરે ॥ ૪૨॥

સા રાજતિ હરેઃ કાન્તા યા રાજાદિકૃતાદરા ।
ધીરારાધ્યા ચ સરસા ધીરાદિહિતદાયિની ॥ ૪૩॥

રતિનાયકદાયાદા ગતિરેષા સનાતની ।
યતિધ્યાનાર્હચરિતા નતિકૃત્કલિનાશિની ॥ ૪૪॥

ધારાધરસદૃઙ્નૈજકચકાન્તિઝરી હરેઃ ।
કાન્તા જયતિ કલ્યાણી શ્રેયઃ સન્તતિદાયિની ॥ ૪૫॥

તનયા જલધેઃ કલાધિનેતૃગ્રથિતાનેકકલાદિહૃષ્ટચેતાઃ ।
સનયાન્ તનયાદિના સનાથાનિહ કાલેન નતાન્ હિ સાધયન્તી ॥ ૪૬॥

અનન્તશક્તેર્લીલાદિસાક્ષિણી જયદાયિની ।
જજ્ઞે ધરણિકન્યા સા દીનત્રાણકૃતાદરા ॥ ૪૭॥

આઞ્જનેયાદરાનીતનાથરત્નનિરીક્ષણાત્ ।
સા સીતા કલિતાનન્દારાતિસઙ્ઘાહિતૈષિણી ॥ ૪૮॥

નિરસિતનિષ્કિઞ્ચનજનદૈન્યા કન્યા હિ સાઙ્ગરેન્દ્રસ્ય ।
તન્યાદદ્ય શ્રેયઃ સાન્દ્રાસાદૃતકટાક્ષકઞ્જશ્રીઃ ॥ ૪૯॥

શેષશાયિન્દયિતે દયાનિધે શ્રીરશેષજનરક્ષણાદરે ।
રાજસે જગતિ રઙ્ગનાયિકા સાજાસલિલશીતલે સ્થલે ॥ ૫૦॥

સાઙ્ગશરણાગતાલેસ્ત્રાયિણિ રઙ્ગેશનાયિકે જનનિ ।
દૈન્યાદિરત્ર ન હિ ન તત્ર નિદાને હિ તે દયાસારઃ ॥ ૫૧॥

આદૃતકાઞ્ચનશાટી કૃતનતિજનગેયનૈજગીર્ધાટી ।
આનન્દાદૃતચેટી રાજતિ હરિનાયિકા .... ॥ ૫૨॥

કૃષ્ણેન યેન દયિતાકાઙ્ક્ષિતદાનાદરેણ નાક્તિલાત્ ।
શાખી સાન્યસ્તઃ કિલ ધરાતલે સ શ્રિયા લસતિ રઙ્ગે ॥ ૫૩॥

કાલિયનાગનિયન્તા કલશનદીશાનકન્યકા નેતા ।
કાલે કાલે જનયતિ નઃ શ્રીરખિલાર્થિદૈન્યહારિદૃશા ॥ ૫૪॥

આશ્રિતરક્ષણધીરા ધીરારાધ્યા ચ સદ્ગુણાધારા ।
ધારાકલિત શ્રેયઃ સા રાજતિ સાગરેન્દ્રતનયા નઃ ॥ ૫૫॥

ધીરાગ્રગણ્યદશરથતનયેરિતશતસહસ્રશરનિકરૈઃ ।
દલિતા રાક્ષસસેનાસઙ્ખ્યેયા જનનિ સા હિ લઙ્કા ચ ॥ ૫૬॥

ચૈદ્યાદ્યા દૈતેયા નિહતાઃ કાલેન તેન કૃષ્ણેન ।
તેન જગત્યા જનનિ શ્રેયઃ સન્તાનલતિકયા હિ તયા ॥ ૫૭॥

હરિણા તેન નૃહરિણા કાલેન તથા હિરણ્યકસ્તેન ।
કાન્તેનાકલિ કલિતાહ્લાદઃ સ ચ તનયદૈન્યહારિદૃશા ॥ ૫૮॥

શ્રિયઃ શ્રિયારાધિતયા સકલાશ્ચ કલાસ્તથા ।
રસા ચ સારસાસારા લલના લલિતક્રિયાઃ ॥ ૫૯॥

શર્કરાક્ષીરાદિસદૃગ્રસા ચ સરલા ચ ગીઃ ।
તનયાદ્યાશ્ચ યેઽનિન્દ્યાસ્તન્યન્તે ધરણીતલે ॥ ૬૦॥

તયા હિ હિતદાયિન્યા સીતયાદૃતજાતયા ।
ધ્યાનાર્હયા સનાથાસ્તે દયાહૃદયયા જનાઃ ॥ ૬૧॥

ધરાધરધરઃ કૃષ્ણઃ કાલિન્દીતટકેલિકઃ ।
નાકિનાથનતાઙ્ઘ્રિશ્ચ યસ્યા નેતા ચ ગીયતે ॥ ૬૨॥

અષ્ટદિઙ્નાયકારાધ્યા નષ્ટરાજ્યાદિદાયિની ।
સૃષ્ટિસ્થિત્યધિનેત્રી સા સાષ્ટાઙ્ગનતિરક્ષિણી ॥ ૬૩॥

સદર્હણાદિલસિતા સાન્નદાનાદિદાયિની ।
સત્સઙ્ઘત્રાણજનિતા સા સીતા સારસાસના ॥ ૬૪॥

શાન્તારાધિતયા કાલે તાન્તયારણ્યચારતઃ ।
કાન્તયા હિ હરેઃ કાલે સાન્તકા ન નરાઃ કૃતાઃ ॥ ૬૫॥

આદરેણ કલિતાર્ચનશ્ચ યસ્તસ્ય તસ્ય નગરી ગરીયસી ।
સાગરેન્દ્રતનયાદૃશા શ્રિયઃ સાદરેણ કલિદૃષ્ટિહારિણી ॥ ૬૬॥

સૃષ્ટિસ્થિતિલયાદેર્યઃ કર્તા નાથ ઇતીરિતઃ ।
સા શ્રીઃ સહચરી તસ્ય ખ્યાતા સીતાદિના સદા ॥ ૬૭॥

સા ધારણીયચરિતા તાથાગતનિરાસિના ।
નાથાર્હકેલિર્જયતિ ગાધા શ્રેણીકૃદીડિતા ॥ ૬૮॥

જરાદિહાનિદા સેન્ધે ધરાધરગણેડિતા ।
નિરાકૃતાર્તિર્જનની કરાકલિતસારસા ॥ ૬૯॥

સીરાકૃષ્ટસ્થલે જાતા ધીરારાધ્યસ્ય નાયિકા ।
સારાર્થકૃદ્યાસારા નારાયણસહાસના ॥ ૭૦॥

તારનાથાદૃતાસ્યૈષા સારધીસદ્ગણાર્ચિતા ।
યા રક્ષણે ધૃતદયા સારક્ષેત્રાદિદાયિની ॥ ૭૧॥

નિજનાથશસ્ત્રદલિતારિચયા જનકાધિરાજતનયા જનની ।
કલિતશ્રિયા હિ નિજયા હિ દૃશા જનતાહિતાય કિલ રઙ્ગતલે ॥ ૭૨॥

રઙ્ગતલકલિતકેલિઃ સજ્જનરક્ષાદરેણ કલ્યાણી ।
નિજકરકિસલયકલિતાનન્તશયાઙ્ઘ્રિશ્ચ રાજતે જનની ॥ ૭૩॥

કલશસાગરકન્યકયા તયા જગતિ સજ્જનરક્ષણદીક્ષિતઃ ।
કલિતરઙ્ગગૃહે હરિરેધતે કરકૃતાદરશઙ્ખરથાઙ્ગકઃ ॥ ૭૪॥

દિશિ દિશિ ધનધારા દૈત્યજિન્નિત્યદારાઃ
    કૃતનતિજનધીરારાધિતા જાતસારા ।
કલિતગગનચારા કાશતે રત્નહારા
    નિરસિતજનિનારા સત્કૃતાનન્દસારા ॥ ૭૫॥

ધનતરશશિહારા શ્રેયસઃ સા હિ ધારા

દિનકરશશિનેત્રા રક્ષિતાનેકયાત્રા ।
નિરસિતકલિકાલા નાથકૃષ્ણાર્હલીલા
કનતિ કનકચેલા દીનરક્ષૈકશીલા ॥ ૭૬॥

અનાદિનિધિરેષા નઃ શ્રેયસે જયશાલિની ।
કઞ્જાલયા કૃષ્ણદારા જનની કલિહારિણી ॥ ૭૭॥

ચિરકાલાર્ચિતા ધન્યૈર્ધરણીતનયા હિ નઃ ।
કાઙ્ક્ષિતાનિ દદાત્યેષા કઞ્જાયતદૃશઃ શ્રિયા ॥ ૭૮॥

નાલીકિનીનાથજનાયકેન યદર્થિના કિન્નરગેયકીર્ત્યા ।
લઙ્કા હતા સા શરરાશિદગ્ધા સા જાનકી રક્ષિતસદ્ગણા હિ ॥ ૭૯॥

સારઙ્ગાક્ષી સરસિજકરા સાગરેન્દ્રસ્ય કન્યા
સારાસારાધિગતધિષણૈઃ સન્નતા સન્નતાઙ્ગી ।
સીતા ખ્યાતા સદયહૃદયા સાદરા સાધયન્તી
સૈષા શ્રેયઃ સકલજગતીસદ્ગતીર્દર્શયન્તી ॥ ૮૦॥

કલ્યાણી સા કલશજલધેઃ કન્યકા ક્લેશહન્ત્રી
કાલે કાલે કૃતનતિહિતા કાઙ્ક્ષિતાધિક્યદાત્રી ।
કાન્તારાન્તઃ કલિતચરણા કિન્નરીગીતકીર્તિઃ
કૃષ્ણાકૃષ્ટા કનકસરિતઃ સૈકતે કાન્તકેલિઃ ॥ ૮૧॥

રાસક્રીડારસિકદયિતા રઙ્ગગેહાન્તરસ્થા
રાજશ્રેણીલલિતશિરસાં રત્નનીરાજિતાઙ્ઘ્રિઃ ।
રાજત્યેષા લલિતનગરીરાજધાન્યાદિદાત્રી
રાકાચન્દ્રાદૃતજલધિજા રાજતે રાજતેજાઃ ॥ ૮૨॥

જનનીનિરીક્ષિતા યે તે સરસિજનેત્રરક્ષિતાઃ કલિતાઃ ।
તન્નઃ શ્રેયઃ શ્રેણીજયાદિતતયે સદા લસતિ ॥ ૮૩॥

કલિતાગઃ શતનિચયે જને નતે તે દયાસારઃ ।
કૃતરક્ષણઘાટી સ્યાદિતિ નિશ્ચિત્યાદરેણ જનનિ જનાઃ ॥ ૮૪॥

યા શીતકિરણસહજા સા નસ્ત્રાણાય કલિતદીક્ષા હિ
નિરસિતકૃતાન્તકિઙ્કરદૃષ્ટય એતે જનાઃ કાલે ॥ ૮૫॥

કલયતિ જલનિધિકન્યા ગઙ્ગાસહ્યાદ્રિજાદિતટસઙ્ગા ।
શ્રેયઃ સકલાર્થિહિતા યસ્યાશ્ચરણસ્થલાનિ કલિતાનિ ॥ ૮૬॥

જ્ઞાનઘના સા જનની કન્દલયતિ સારસારસશ્રેયઃ ।
ચન્દનલતયા કનકજલતયારાદાદરાત્ કૃતિકે ॥ ૮૭॥

દયયા શીતલહૃદયા સારસહસ્તા ચ લસતિ જનની નઃ ।
રક્ષિતસત્સઙ્ઘારાન્નાકિગણાર્ચ્યાઙ્ઘ્રિસરસિજા કાલે ॥ ૮૮॥

રક્ષિતરસિકગણૈષા કિસલયચરણા હિ જયતિ જનની નઃ ।
કીરગણકલ્યગીરિહ સકલે શાસ્ત્રાર્થસઞ્ચયે લસિતા ॥ ૮૯॥

આદૃતસત્સત્કારા નાથહિતાનાથરક્ષણૈકદૃશા ।
કલયતિ નૈજદૃશા કિલ નઃ શ્રેયઃ કલિનિરાસકૃતઘાટી ॥ ૯૦॥

જનની કલઙ્કરહિતાનના ઘનશ્રીઃ સદા લસતિ રઙ્ગે ।
રસઘનનિજાસ્યસરસિજગીરેષા સત્યસન્ધાના ॥ ૯૧॥

કેકાનાદે કનકકદલીકાણ્ડનીલાન્તરાલે
    કઞ્જાક્ષી સા કનકસરિતઃ કેલિગેહાન્તરસ્થા ।
કાન્તક્રીડાકલિતહૃદયા રક્ષણે દત્તકેલિઃ
    કલ્હારશ્રીકરકિસલયા કજ્જલાક્તાયતાક્ષી ॥ ૯૨॥

ચન્દ્રકલાચન્દનરસઘનસારાદ્યૈઃ સદૃગ્ગિરા જનની ।
જનયતિ રક્ષાદાયિન્યેષા કઞ્જાક્ષહૃદ્ઘનિજકલનાઃ ॥ ૯૩॥

જિતસારઙ્ગાક્ષી સા યા રઙ્ગાક્ષીડિતા ચ રઙ્ગતલે ।
કલયતિ દાનાનિ હિ નઃ કાલે કાલે ચ કૃષ્ણજલદેન ॥ ૯૪॥

અઞ્જનાદ્રીશકેલ્યા યાદૃતચિત્તા સનાતની ।
નિરઞ્જનજનૈરેષારાધિતા હિ ચિરાય સા ॥ ૯૫॥

નાકેશનગરીકાન્તાલાલ્યનૈજાઙ્ઘ્રિસારસા ।
જનની ચન્દ્રસહજા સા રઙ્ગાદિતટે સ્થિરા ॥ ૯૬॥

રાજતિ હરિહૃદયે સા કલિતત્રાણા કૃતાગસિ જને હિ ।
યલ્લીલારસઘાટ્યાકૃષ્ટકૃદિન્ધે સ રઙ્ગેશઃ ॥ ૯૭॥

અતિશયિતનૈજદાના સા શ્રીરાનન્દકન્દલશ્રીર્હિ ।
જનની રક્ષિતધરણી નિરસિતદેહીતિ ગીરિહાર્યેડ્યા ॥ ૯૮॥

નતકાક્ષિતદાનકલાકલિતાદૃતગેયકીર્તિકલિકા સા ।

રાજતિ રઙ્ગેશગૃહે સનાતની સન્નિધિઃ શ્રીર્હિ ॥ ૯૯॥

નિરસિતાધરસઙ્ગનિજાક્ષરગ્રથિતયા હ્યનયા હરિનાયિકા ।
જયતિ સા ધૃતહર્ષણસન્તતિઃ કૃતધનાદિરિહાદૃતસદ્ગણા ॥ ૧૦૦॥

ઇતિ નિરોષ્ઠ્યપદૈર્લલિતામિમાં સ્તુતિમુદારમતિઃ કૃતકૌતુકઃ ।
જયતિ કૃષ્ણકવિઃ કમલાપદામ્બુજયુગે કલયન્ સફલક્રિયઃ ॥ ૧૦૧॥

ઇતિ કૃષ્ણકવિપ્રણીતં નિરોષ્ટ્યમિન્દિરાશતકં સમ્પૂર્ણમ્ ।
સ્તોત્રસમુચ્ચયઃ ૨ (૮૨)

Proofread by Rajesh Thyagarajan

*Niroshthayam Indira Shatakam*

pdf was typeset on May 11, 2023

Please send corrections to *sanskrit@cheerful.com*